International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(6): 77-83
© 2023 IJSR
www.anantaajournal.com
Received: 12-09-2023
Accepted: 16-10-2023

**पराशरं भावनारायणाचार्यः**
श्रीवैखानसागमव्याख्याता
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपति, आंध्र प्रदेश, भारत

**Corresponding Author:**
**पराशरं भावनारायणाचार्यः**
श्रीवैखानसागमव्याख्याता
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपति, आंध्र प्रदेश, भारत

# वेदेषु चन्द्रः

**पराशरं भावनारायणाचार्यः**

## प्रस्तावना

संस्कृतसाहित्यस्य मूलभूताः वेदाः। तेषामाधारेणैव भारतीयः धर्मः प्रचलति। एते विश्वसाहित्येऽनन्यं स्थानमुपगताः। ते च वेदाः चत्वार इति सिद्धम्। तेषु ऋग्वेदः देवतास्तोत्र-रूपः। यतो हि यजुर्वेदः यज्ञकर्मविनियोगरूपः। सामवेदो गानयोग्यः। अथर्ववेदस्तु कामनाना-मस्माकं पूरणाय देवताप्रार्थनपरत्वेन वैज्ञानिकसमालोचनात्मकत्वेन विद्यते। एवञ्च ऋग्वेदेन भावनानां पवित्रत्वं, यजुर्वेदेन कर्मणां पवित्रत्वं, सामवेदेन हि उपासनानां पवित्रत्वं, एवञ्चाथर्व-वेदेन समता अथवा स्थितप्रज्ञता[1] भवतीति विदुषां वचनम्[2]। वेदत्रयी पारलौकिकसुखसन्धायिका किन्त्वथर्ववेदः ऐहिकसुखसौभाग्यसन्धायक इति सायनोऽपि अभिप्रैति[3]।

## वेदेषु चन्द्रार्थकशब्दविचारः

ऋग्वेदे चन्द्रः प्रधानतया सोमपदेन कथितः। यजुरथर्ववेदयोश्चन्द्रचन्द्रमाशब्दौ प्रायशः उपलभ्येते। अथर्ववेदस्तु सोमं चन्द्रमश्शब्दख्यातमिति वदन्, देवताविषये चन्द्रमश्शब्दस्य प्रसिद्धिं सूचयति[4]। यास्कोऽपि "इन्दुः" "गौः" "चन्द्रः" "चन्द्रमाः" "सोमः" इति पञ्चपदानि चन्द्रार्थे निरुक्तवान्*।

(*"निरुक्तं तत्र चन्द्रः" निरुच्यते निश्शेषेणोपदिश्यते निर्वचनधिया तत्तदर्थबोधनाय पदजातं यत्र तत् "निरुक्तम्"। निर्वचनमुखेन पदानामर्थावगमो यद्यपि व्याकरणेनापि सिद्ध्यति तथापि निरुक्तानुसारेणैवार्थाः निर्वक्तव्याः, विशेषतया वैदिकशब्दार्थाः इति विज्ञायते। उक्तं च यास्केन - "अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते। अर्थमप्रत्ययतो नात्यन्तं स्वरसंस्कारोद्देशः। तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकं च। न हि निरुक्तार्थावित् कश्चिन्मन्त्रं निर्वक्तुमर्हतीति वृद्धानुशासनम्। निरुक्तप्रक्रियानुरोधेनैव मन्त्राः निर्वक्तव्याः नान्यथा।। इति[5] भर्तृहरिस्तु निरुक्तलक्षणमेवं विशिनष्टि –

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थाभिनयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्[6]।।
इति।

वेदगतकठिनशब्दसङ्ग्रहरूपो निघण्टुग्रन्थश्चिरादागच्छति स्म। तत्रैव यास्केन तद्व्याख्याभूतं निरुक्तं विरचितम्। निघण्टवो वेदशब्दस्वरूपाः तन्मयत्वेन एतेऽपि वेदाः एव भवन्ति। तद्व्याख्याभूतप्रबन्धस्तु निरुक्तसंज्ञको भवति। स एव वेदाङ्गभूतो कथ्यते।

यास्कः स्वनिरुक्ते द्वादशनिरुक्तकारान् स्मृतवान्। ते च औपमन्यवः, औदुम्बरायणः, वार्ष्यायणिः, गार्ग्यः, आग्रायणः, शाकपूनिः, और्णनाभः, तैटीकः, गालवः, स्थूलोष्ठी, कार्यक्यश्चेति। अतः यास्कात् प्रागपि बहवो निरुक्तकाराः आसन् इति विज्ञायते। पाणिनेः प्राचीनो यास्कः क्रीस्तोः पूर्वं सप्तशताब्दीयः इति ऐतिहासिकानामभिप्रायः[7]।

सम्प्रति यास्कीयं निरुक्तमेवोपलभ्यते। इदं निरुक्तं निघण्ट्वपरनामकस्य पञ्चाध्यायात्मकस्य समाम्नायस्य व्याख्यारूपेणोपपन्नम्। मूलभूते नैघण्टुकसमाम्नाये पञ्चाध्यायाः सन्ति। प्रथमाद्यध्यायत्रये गवादीनां पर्यायशब्दाः पठिताः। चतुर्थे तु दुर्ज्ञेयार्थाः शब्दास्सङ्गृहीताः। पञ्चमे अग्न्यादयो देवाः निर्दिष्टाः। एतान् विषयान् यास्काचार्यः द्वादशभिरध्यायैः शब्दनिर्वचनद्वारा प्रतिपादयन् निरुक्तशास्त्रं निबबन्ध। परिशिष्टात्मकत्वेन त्रयोदशचतुर्दशाध्यायावनुबद्धाविति केचन कथयन्ति[8]। किन्त्विदानीन्तनैः प्रकाशिते निरुक्तग्रन्थे परिशिष्टत्वेन त्रयोदशोऽध्याय एक एव दृश्यते[9]।)

तत्र क्रमशः तेषां प्रयोगाः पश्यामः –

**इन्दुः**

अयं द्योतयदद्युतो व्यक्तून् दोषावस्तोः शरद इन्दुरिन्द्र।
इमं केतुमदधुर्नू चिदह्नां शुचिजन्मन उषसश्चकार[10]।।
तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः[11]।।
तस्मै त इन्दो हविषो विधेम वयं स्याम पतयो रयीणाम्[12]।।
आयं विशन्तीन्दवो वयो न वृक्षमन्धसः।
विरप्शिन् वि मृधो जहि रक्षस्विनीः[13]।।

**गौः**

विरलतया दृश्यते इन्दुशब्दः चन्द्रार्थे वेदेषु। ततोऽप्यधिकविरलतया केवलं लाक्षणिकार्थे गोशब्दः चन्द्रार्थे प्रयुक्त इति निरुक्तवचनैरवगम्यते।

यथा - "अत्राह गोरमन्वत नाम त्वष्टु रपीच्यम्। इत्था चन्द्रमसो गृहे[14] इति।

अत्र हि मन्त्रे गो शब्दस्य चन्द्रार्थकत्वं निरुक्तवानेवं हि यास्कः। "सोऽपि गौरुच्यते" स एव सुषुम्णाख्यः सूर्यरश्मिरपि गौरुच्यते। तत्सम्बन्धात् स चन्द्रोऽपीत्यपि शब्दार्थः[15] इति। "अत्राहास्मिन्नेव गोर्गन्तुश्चन्द्रमसो गृहे मण्डले त्वष्टुर्दीप्तस्यादित्यस्य सम्बन्ध्यपीच्यं रात्रावन्तर्हितं स्वकीयं यन्नाम तेजस्तदादित्यस्य रश्मय इतीत्थमनेन प्रकारेणामन्यत अजानन्" इति सायणः[16]।

**चन्द्रः**

चन्द्रार्थे चन्द्रशब्दप्रयोगो वेदेषु विद्यते। यथा –

चन्द्रमग्निं चन्द्ररथं हरिव्रतं वैश्वानरमप्सुषदं स्वर्विदम्।
विगाहं तूर्णितविषीभिरावृतं भूर्णि देवास इह सुश्रियं दधुः[17]।।
ओं चन्द्राय स्वाहा[18]।।
अग्निः प्राणान्त्सं दधाति चन्द्रः प्राणेन संहितः।
व्यहं सर्वेण पाप्मना वि यक्ष्मेण समायुषा[19]।।

**चन्द्रमाः**

चन्द्रशब्दापेक्षया चन्द्रमश्शब्दो वेदेषु चन्द्रार्थे समधिकतयासमायाति। यथा –

चन्द्रमा मनसो जातः चक्षोः सूर्यो अजायत।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत[20]।।

**सोमः**

सर्वाधिकतया चन्द्रार्थे चन्द्रश्चन्द्रमश्शब्दयोरपेक्षया सोमशब्दः प्रयुक्तो वेदवाङ्मये। सोमलतायाः सोमस्य चाभेदता स्वीक्रियते

बहुषु मन्त्रेषु। सोमशब्दः लताविशेषविषये एवाधिकतया प्राधान्येन च बहुषु मन्त्रेषु पठितः, तथापि तत्र देवतारूपेण सोमश्चन्द्र एवेति विज्ञायते। अत एव ऋग्वेदे देवताविषये सोमस्य तृतीयं स्थानं कथयन्ति विचारकाः[21]।

अयं सोमः ऋग्वेदानन्तरसाहित्ये एव चन्द्रत्वेन स्वीकृत इति "आल्फ्रेड् हिल्लेब्राण्ड्" महोदयानां मतम्[22]। तत्र चन्द्रार्थे सोमशब्दप्रयोगो यथा –

सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति।
सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै[23] ।।
त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।
त्वमा ततंथोर्वाऽन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ[24] ।।
वयं सोम व्रते तव मनस्तनूषु बिभ्रतः। प्रजावन्तः सचेमहि[25]।।
आचार्यो मृत्युर्वरुणः सोम ओषधयः पयः ।
जीमूता आसन्त्सत्वानस्तैरिद् स्वराभृतम्[26] ।।

ऋग्वेदे नवममण्डलं सर्वं पवमानसोमविषयकमेव[27]। सामवेदे कथितः प्रमुखसंस्कारवर्णनात्मकः मन्त्रसमूह[28] एव तत्रोपवर्णितः। अत्र प्रधानतया सोमरस एव सोमशब्देन कथितः। किन्त्वधिदेवतात्वेन तत्र चन्द्रं कथयामास वेदपुरुषः। प्रायशोऽत्र हि रसात्मकं सोमं विहाय देवताविषयकः सोम एवास्माभिः स्वीक्रियते।

**ऋग्वेदे चन्द्रः**

नृणां शतस्य कृते पर्याप्ताय तेजोबलप्रादायान्नाय, धनाय, स्वेषामन्नविघातकानां विनाशाय प्रार्थ्यते चन्द्रः[29]।

एवं चन्द्रं यः स्तौति सः सत्यामृताभ्यां युक्तस्सन् लोके विराजते। अयं हि चन्द्रः पितृदेवताभ्यो देवैस्समं भोगमुपकल्पयति[30]। आकाशपृथ्वीपर्वतौषधीजलेषु यत्रकुत्रापि स्थाने भवत्यपि विद्वेषस्मासु विहाय आनन्देनागच्छन् हविषां स्वीकारायायं चन्द्रः प्रार्थ्यते[31]।

सोमस्यानुकूलकः कदापि न म्रियते[32]। तरुणभक्ताः दीर्घजीवनं बलं भाग्यं चानेन प्राप्नुवन्ति[33]।

अस्माभिर्यज्ञे स्तुतः समागतः अस्मान् संवर्धयति[34]।

दातृजनानां कृते सोमः गां ददाति। अपि च कर्मणि कुशलं, सुवीरं, दक्षं, पितुः यशः प्रदातारं कुमारं समर्पयति[35]।

अन्तरिक्षे अयं धावति[36]। सोमोऽस्मभ्योऽस्मद्पशुभ्यश्च रोगरहितं पुष्टिप्रदमन्नं प्रयच्छति[37]।

श्रेष्ठमार्गेषु गन्ता सोमः देवतायोग्येषु समुन्नतेषु यज्ञस्थानेषु समागच्छति[38]।

अस्माकमायुर्वर्धयन्, अस्मासु च अहङ्कारं विनाशयति[39]।

सत्यव्रतानाम् आचारव्रतानाम् अन्नदातॄणां च दूषकं नियमयितुमथवा निर्धनं कर्तुं सोमोऽस्माभिः प्रार्थ्यते[40]। दुष्टस्वप्नैः भीताः सोमसंरक्षणेन विजयिनः लाभमुपगताः पापविमुक्ताश्च भवन्ति। अतश्चन्द्रदेवतायाः स्तवनम् अस्माकमुत्तमं संरक्षकं मनुते वेदर्षिः।

रसात्मकं सोमं पीत्वा जनः नितरां बुद्धियुक्तो भवति। अस्मदन्तःप्रविष्टः सोमः क्रोधं दूरीकरोति। इन्द्रसहायं स्वीकृत्यास्माकं धनप्रदानाय, रथिनमश्व इव तं वेगेन प्रवर्तयति[41]। रसात्मकं सोमं पीत्वा प्राणिनः तेजस्विनो देवताज्ञानिनः भवन्ति। तर्हि शत्रवो तेभ्योऽपकर्तुं न समर्थाः भवन्ति[42]।

धनाभिलाषी सोमं धनिनं जानाति। ये ये यदभिलषन्ति ते ते तत्तत् सोमे पश्यन्ति। सोमप्रभावादपगतधनाः पुनर्धनं लभमाणाः यज्ञेषु प्रवर्तन्ते। स्वेषां स्वल्पायुषं निर्जित्वा दीर्घायुषः भवन्ति[43]। सोमोऽस्मासु क्रोधरहितो भवितव्य इति भयं न प्रददात्विति, हृदयव्यथां मा करोत्विति जनाः एनं प्रार्थयन्ति। देवानां कृपाराहित्यमस्मासु यदा पश्यति सोमः तदा सद्यस्तेषां क्रोधदूरीकरणाय सोऽस्माभिः व्रियते।

सुखदायकं सोममस्मभ्योऽसज्जनदूरीकरणाय प्रार्थयति वेदपुरुषः[44]। एवमेव सोमोऽस्मान् मृत्योरधीनान्मा करोतु, वयमुपरि सरन्तं सूर्यं पश्यामः, अस्माकं वृद्धावस्थापि प्रतिदिनं सुखदायकमेव भवत्विति प्रार्थ्यते ऋषिणा सोमः[45]।

**यजुर्वेदे चन्द्रः**

सोमाय हविरादिकं समर्पयन् यजुर्वेदपुरुषः एवं प्रतिज्ञां करोति। हे सोम वयं तव नियमे भवामः। शरीरे मनोरूपेण त्वां धारयन् जीवितं सङ्घसेवायै उपयुज्मः[46]।

अपि च लतात्मकं सोमम् अग्नीषोमरूपाभ्यां मन्वानो याज्ञिकः विष्णुप्रीतये तां स्वीकरोति[47]। इन्द्रस्य वृद्ध्यै, मित्राणां धनवृद्ध्यै, यज्ञसमाप्त्यै, सत्यवादिभिरैश्वर्यप्राप्त्यै, सन्मार्गनिर्देशाय चास्माभिः प्रार्थ्यते सोमः वेदमन्त्रैः[48]। यज्ञेषु घृतादिभिराहूयते सोमः। तत्र सः सर्वदेवतात्मकत्वेन, शत्रूणां राक्षसानां दण्डनदातृत्वेन भाव्यमानोऽस्ति। एनं सोमं तत्र वेदपुरुषः तेजस्विनं, स्वस्य शासकं, बलिनं सुन्दरं च मनुते[49]। यथायं पृथिव्यन्तरिक्षद्युलोकान् प्रकाशयति तथा दातॄणां प्रकाशाय च प्रार्थ्यते वेदपुरुषेण[50]। अन्नानि मधुरसयुक्तानि कर्तुं सोमाय हविरर्प्यते[51]। सूर्यमुभयपार्श्वतो द्रष्टुं यादृशी शक्तिरावश्यकी तादृशी शक्तिः प्रार्थ्यते चन्द्रात्[52]। सोमो यथैश्वर्यप्रकाशकः पराक्रमयुक्तः बलवान् जन्मादिरहितः तथा तेन तुल्यं प्रकाशः पराक्रमः बलम् ऐश्वर्यं मृत्युञ्जयत्वं च प्रार्थ्यते तस्मात्[53]। सूर्याचन्द्रमसोस्समादध्यापकात् तथोपदेशकात् वयं पवित्रां बुद्धिं लभेम[54]। ओषधयः आत्मनो राजानं सोमम् एवं प्रार्थयन्ति – राजन् यः पुरुषः विद्वान् अस्माकं मूलैः फलैः पत्रैः चिकित्सां करोति यस्मै, तस्मै रोगयुक्ताय वयं निश्चयेनाऽरोग्यप्रदात्र्यः भवामः इति[55]। विश्वव्यापकतेजसे यज्ञनिर्वहणाय अन्नप्राप्त्यै च सोमः प्रार्थ्यते। सोमानुग्रहेण पितरो देवतासु सर्वोत्तमम् ऐश्वर्यं प्राप्नुवन्ति[56]। सोमार्थं हंसान् लवान् कुलङ्गान् आरण्यकमजं पुरुषमृगम् अभिलषन्ति जनाः[57]।

युद्धेष्वप्रतिद्वन्द्वपराक्रमः, सेनानां पालकः, द्युलोकवासी, जलप्रदाता, बालकानां रक्षकः, शत्रुविजेता, सुन्दरभवनोपेतः, मनोज्ञकीर्तिविलसितश्चायं सोमः, इन्द्राय हविर्दत्तवते यजमानाय धेनवः प्रयच्छति, शीघ्रगामिनमश्वं ददाति, कर्मणि दक्षं गृहकार्येषु कुशलं यज्ञेषु प्रवीणं पित्राज्ञापालकं कुमारं च प्रसादयति, सर्वाः ओषधयः जलं चोत्पादयति, धेनवः प्रकाशयति, दिव्यमनसाऽस्माभिर्धनं सम्पादयति, अन्तरिक्षं विस्तृतिं कृत्वा स्वतेजसा प्रकाशयति, अस्मान् च दानशीलिनः करोति[58]।

**अथर्ववेदे चन्द्रः**

जगदग्नीषोमात्मकम्[59]। अग्नीषोमौ यज्ञस्य पक्षाविव ऋषयोऽकल्पयन्[60]। अग्नीषोमाभ्यां यजमानो बलं धनं सङ्घे उत्तमं स्थानं च प्रार्थयति। तदर्थं श्रेष्ठकर्माचरणाय सङ्कल्पयति च[61]। अग्नि सोम वरुण पूतदक्ष वात पर्जन्यानां शोभनानुग्रहेण नरः पालितो भवति[62]। इन्द्राग्निसोमभूतैस्सहात्मानं यशस्तमं मनुते वेदर्षिः[63]। राजानं राज्ये स्थिरीकरोति सोमः[64]। क्रतुविघ्नकरान् नाशयति। अस्मत्क्षेमायास्मान् सङ्ग्रामेषु शोभनमनस्कान् करोति[65]। अस्माकं शत्रून् इन्द्राग्नाविव बध्नाति सोमः[66]। उत्तरपृथ्व्यां सूर्याचन्द्रमसौ अस्मान् परिरक्षतः[67]। इन्द्रेण सह हिंसकान् राक्षसान् प्रति वज्रायुधं प्रेषयति चन्द्रः। अस्मद्रक्षणाय जागरूकश्च भवति। असज्जनान् प्रतिकूलदृष्ट्या पश्यति[68]। राजा सोमोऽस्माकं सुखदायी[69]। तस्मिन् चन्द्रमसि यशः परिनिष्ठितः[70]। सोमे भागं गताः आपः शुक्रं वर्चः अस्मासु प्रसरन्ति[71]। अस्मदपराधान् विस्मरन् स्वर्गे लोके स्थितस्सोमोऽस्मदिष्टापूर्तान् शोभनमनसा फलप्रदान् करोति[72]। प्रेमप्रापकं वीर्यप्रदं शिरः सोमेनास्मभ्यं दत्तं, ततो जातेन स्नेहभावेन हृदयं शुचि क्रियते[73]।

विश्वपुरुषे चन्द्रो नवनवोन्मेषितो भवति[74]। प्राणम् अमृतमयचन्द्रात्मकत्वेन भावयति जनः[75]। ब्रह्मचारी अग्नौ सूर्ये चन्द्रमसि वायौ जले समिधप्रक्षेपणं करोति[76]।

**चन्द्रस्योत्पत्तिः**

चन्द्रः कुतो जातः[77]? इति स्वस्मै प्रश्नमकरोत् वेदपुरुषः। एष विषयः को वा वेत्ति ? इति पुनः स्वस्मै प्रश्नमकरोत् सः वेदर्षिः। क्रमशः तस्यैव कश्चन निश्चितः अभिप्रायः समागतः। तदनु सः कथयति "एनं विषयमहं वेद्मि" इति[78]। किन्तु तत्र तस्य समाधानं सः न कथयति, तथापि वेदेषु सर्वत्र तस्योत्तरं विद्यते यत् चन्द्रः परमात्मनः मनसः जात इति[79]।

## सूर्यचन्द्रयोर्गतिः

सूर्यचन्द्रौ स्वकीयतेजोभिः प्राक्पश्चिमदिशोश्चरतः शिशू इव क्रीडन्तावेतौ यज्ञेषु गच्छतः। अनयोः सूर्यः सर्वभुवनानि पश्यति। चन्द्रस्तु ऋतून् मासद्वयपरिमाणिनः कृत्वा वारं वारं समुद्यते। प्रतिदिनमुत्पद्यमानोऽयं चन्द्रः नवो नवो भवति। कृष्णपक्षरात्रिषु प्रातः कालपूर्वभागेषु समागच्छन् दिनानां सूचको भवति। आगच्छन् चन्द्रः यज्ञभागं कल्पयति देवानाम्। अपि चायमागच्छन् सर्वेषामानन्दं दीर्घायुषं च प्रददाति[80]।

## दिवि सोमो अधिश्रितः

देवानां मध्ये सत्यभूतेन ब्रह्मणा अधःस्थिता भूमिरुत्तमिता। तथा सूर्येण द्यौः उत्तमिता। एवम् ऋतेन (यज्ञेन) अदितेः पुत्राः देवाः उपजीवन्ति। दिवि सोमो देवानामाप्यायकारी वल्लीरूपो देवतारूपश्च सन् अधिश्रितः। अस्यैकैककलाऽऽस्वादनात् अदितेः पुत्राः इन्द्रादयो देवाः बलिनो भवन्ति। अपि चायं सोमः नक्षत्राणाम् उपस्थाने द्युलोके आहितः[81]।

## वायुः सोमस्य रक्षिता

यम् ओषधिरूपम् अभिषवग्रावभिः अध्वर्यादयो यजमानश्च सोमं मत्वा पीतवन्तः, सः सोमः अभिज्ञैः ज्ञातः सोमः न। यं हि चन्द्रमसं कथयन्ति न तस्य कश्चनादेवः मनुष्यादिः अश्नाति। आच्छद्विधानैः रक्षितः, तथा बार्हतैः स्वानभ्राजांधार्यादिभिः सप्तभिः सोमपालैः रक्षितः सोमः अभिषवग्राव्णां ध्वनिं शृण्वन्नेव तिष्ठति। तं हि पार्थिवो जनो नाश्नाति, यतो द्युस्थचन्द्ररूपोऽत्रत्यैः पानयोग्यो न भवति खलु। चन्द्रमा एव सोमः स हि देवानामन्नं भवति। यदा हि चन्द्रकलाः देवैः पीताः भवन्ति, अनन्तरमेव पूर्वपक्षे ताः कलाः पूरयन् वायुः सोमस्य रक्षको भवति। एवमेकैककलाक्षयसंवृद्धिभ्यां चन्द्रः मासस्य, तैर्मासैः संवत्सरस्य च कर्ता भवति[82]।

## संदर्भ सूची


1. थवतिर्गतिकर्मा न थर्व इत्यथर्वः। अतोऽथर्वस्यार्थः निश्चलता समता स्थितप्रज्ञता।। ऋ.वे.सात्वलेकर् भूमिका.पु.3
2. ऋ.वे. सात्वलेकर् भूमिका.पु.3
3. अ.वे.(ति.ति.दे.प्रति) प्र.भाभूमिका.पु.8
4. सोमो मा देवो मुञ्चन्तु यमाहुश्चन्द्रमा इति ।। अ.वे.।।11-6-7
5. निरु.पु-37-38
6. सं.सा.इ.पु-18
7. सं.सा.इ.पु-18
8. वै.सा.च.पु-330
9. मेहरचन्द् लक्ष्मणदास् नईदिल्ली-1982 प्रकाशिते दुर्गाचार्यव्याख्योपेते निरुक्तग्रन्थे।
10. ऋ.वे-6-39-3
11. य.वे-19-52
12. य.वे-19-54
13. अ.वे-6-2-2
14. ऋ.वे-1-84-15
15. निरु.पु-74
16. ऋ.वे-1-84-15 मन्त्रव्याख्या।
17. ऋ.वे-3-5-5
18. य.वे-22-28
19. अ.वे-3-31-6
20. ऋ.वे-10-90-13, य.वे-31-12, अ.वे-19-6-7
21. वै.माइ.पु-198
22. This soma is identical with the moon in the latter hymns of R.V. only. V.M.. Vol.-1, P-185
23. ऋ.वे-1-91-20
24. ऋ.वे-1-91-22
25. य.वे-3-56
26. अ.वे-11-5-14
27. 114 सूक्तानि
28. 1108 मन्त्राः
29. अस्मे सोम श्रियमधि नि धेहि शतस्य नृणाम्। महि श्रवस्तुविनृम्णम्।। 7 ।। मा नः सोम परिबाधो मारातयो जुहुरन्त। आ न इन्दो वाजे भज। ऋ.वे-1-43-8
30. त्वं सोम प्र चिकितो मनीषा त्वं रजिष्ठमनु नेषिपन्थाम्। तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः।। ऋ.वे-1-91-1
31. या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु। तेभिर्नो विश्वैः सुमना अहेळन्राजन्सोम प्रति हव्या गृभाय।। ऋ.वे-1-91-4
32. त्वं नः सोम विश्वतो रक्षा राजन्नघायतः। न रिष्येत्त्वावतः सखा।। ऋ.वे-1-91-8

33. त्वं सोम महे भगं त्वं यून ऋतायते। दक्षं दधासि जीवसे।। ऋ.वे-1-91-7
34. इमं यज्ञमिदं वचो जुजुषाण उपागहि। सोम त्वं नो वृधे भव।। ऋ.वे-1-91-10
35. सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं ददातु। सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै।। ऋ.वे-1-91-20
36. चन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि।। ऋ.वे-1-105-1
37. सोमो अस्मभ्यं द्विपदे चतुष्पदे च पशवे। अनमीवा इषस्करत्।। ऋ.वे-3-62-14
38. सोमो जिगाति गातुविद्देवनामेति निष्कृतम्। ऋतस्य योनिमासत।। ऋ.वे-3-62-13
39. अस्माकमायुर्वर्धयन्नभिमातीः सहमानः। सोमः सधस्थमासदत्।। ऋ.वे-3-62-15
40. ये पाकशंसं विहरन्त एवैर्ये वा भद्रं दूषयन्ति स्वधाभिः। अहये वा तान्प्रदातु सोम आ वा दधातु निर्भृतरुपस्थे ।। (ऋ.वे-7-104-9)
41. स्वादोरभक्षि वयसः सुमेधाः स्वाध्यो वरिवोवित्तरस्य । विश्वे यं देवा उत मर्त्यासो मधु बुवन्तो अभि सञ्चरन्ति ।। अन्तश्च प्रागा अदितिर्भवास्यवयाता हरसो दैव्यस्य । इन्दविन्द्रस्य सख्यं जुषाणः श्रौष्टीव धुरमनु राय ऋध्याः ।। (ऋ.वे-8-48-1,2)
42. ऋ.वे-8-48-3
43. अर्थिनो यन्ति चेदर्थं गच्छानिद्दुषो रातिम्। ववृज्युस्तुष्यन्तः कामम्।। विदधत्पूर्व्यं नष्टमुदीमृतायुमीरयत्। प्रमायुस्तारीदतीर्णम्।। (ऋ.वे-8-79-5,6)
44. मा नः सोम सं वीविजो मा वि बीभिषथा राजन्। मा नो हृदि त्विषा वधीः।। अव यत्स्वे सथस्ये देवानां दुर्मतीरीक्षे। राजन्नप द्विषः सेध मीढ्वो अप सिधः सेध।। (ऋ.वे-8-79-8,9)
45. मो षु णः सोम मृत्यवे परा दाः पश्येम नु सूर्यमुच्चरन्तम् । द्युभिर्हितो जीरमा सू नो अस्तु परातरं सु निऋतिर्जिहीताम्।। (ऋ.वे-10-59,4)
46. वयं सोम व्रते तव मनस्तनूषु बिभ्रतः। प्रजावन्तः सचेमहि।। (य.वे-3-56)
47. अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि विष्णवे त्वातिथेरातिथ्यमसि विष्णवे त्वा श्येनाय त्वा सोमभृते विष्णवे त्वाग्नये त्वा रायस्पोषदे विष्णवे त्वा।। (य.वे-5-1)
48. अं शुरं शुष्टे दर्वे सोमाप्यायतामिन्द्रायैकधनविदे। आ तुभ्यमिन्द्रः प्यायतामात्वमिन्द्राय प्यायस्व। आप्याययास्मान्त्सखीन्त्सन्न्या मेधया स्वस्ति ते देव सोम सुत्यामशीय एष्टा रायः प्रेषे भगायऽऋतमृतवादिभ्यो नमो द्यावापृथिवीभ्याम्।। (य.वे-5-7)
49. ज्योतिरसि विश्वरूपं विश्वेषां देवानाऽसमित्। त्वं सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यऽउरु यन्तासि वरूथं स्वाहा। जुषाणो अप्तुराज्यस्य वेतु स्वाहा।। (य.वे-5-35)
50. यत्ते सोम दिवि ज्योतिर्यत्पृथिव्यां यदुरावन्तरिक्षे। तेनास्मै यजमानायोरु राये कृध्यधि दात्रे वोचः।। (य.वे-6-33)
51. मधुमतीर्नऽइषस्कृधि यत्ते सोमादाभ्यं नाम जागृवि तस्मै। ते सोम सोमाय स्वाहा स्वाहोर्वन्तरिक्षमन्वेमि।। (य.वे-7-2)
52. उपयामगृहीतोऽसि बृहस्पतिसुतस्य देव सोम तऽइन्दोरिन्द्रियावतः। पत्नीवतो ग्रहांऽऽऋध्यासम्। अहं परस्तादहमवस्ताद्यन्तरिक्षं तदु मे पिताभूत्। अहं सूर्यमुभयतो ददर्शाहं दवानां परमं गुहायत्।। (य.वे-8-9)
53. सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयात्। मृत्योः पाह्योजोऽसि सहोस्यमृतमसि।। (य.वे-10-15)
54. अश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व। वायुः पूतः पवित्रेण प्रत्यङ्क्सोमो अतिसुतः। इन्द्रस्य युज्यः सखा।। (य.वे-10-31)
55. ओषधयः समवदन्त सोमेन सह राज्ञा। यस्मै करोति ब्राह्मणस्तं राजन् पारयामि।। (य.वे-12-96)
56. आप्यायस्व समेतु ते विश्वतः सोम वृष्णियम्। भवा वाजस्य सङ्गथे।। (य.वे-12-112)
57. य.वे-31-12
58. य.वे-34.21-23
59. अहं जजान पृथिवी मुत धामह मृतूं रजनयं सप्त सिन्धून्। अहं सत्यमनृतं यद् वदामि यो अग्नी षोमवजुषे सखाया।। (अ.वे-6-61-3)
60. अग्नीषोमा वदधुर्या तुरीयासीद् यज्ञस्य पक्षावृषयः कल्पयन्तः।। (अ.वे-8-9-14)
61. अस्मै क्षत्रमग्नीषोमावस्मै धारयतं रयिम्। इमं राष्ट्रस्याभीवर्गे कृणुतं युज उत्तरम्।। (अ.वे-6-54-2)
62. त्रायध्वं नो अधविषभ्यो वधात् विश्वे देवा मरुतो विश्ववेदसः।

अग्नीषोमा वरुणः पूतदक्षा वातापर्जन्ययोः सुमतौ स्याम।। (अ.वे-6-93-3)

63. यशाः इन्द्रो यशा अग्निर्यशाः सोमो अजायत।
यशा विश्वस्य भूतस्याहमस्मि यशस्तमः।। (अ.वे-6-58-3)

64. इन्द्र एतमदीधरत् ध्रुवं ध्रुवेण हविषा।
तस्मै सोमो अधि ब्रवन्नयं च ब्रह्मणस्पतिः।। (अ.वे-6-87-3)

65. अभिभूर्यज्ञो अभिभूरग्निरभिभूः सोमो अभिभूरिन्द्रः।
अभ्यहं विश्वाः पृतना यथासान्येवा विधेमाग्निहोत्रा इदं हविः।। (अ.वे-6-97-1)

66. ऐनान् घतामिन्द्राग्नी सोमो राजा च मेदिनौ।
इन्द्रो मरुत्वानादानममित्रेभ्यः कृणोतु नः। (अ.वे-6-104-3)

67. शिवास्ते सन्त्वोषधय उत् त्वाहार्ष मथरस्या उत्तरां पृथिवी मभि।
तत्र त्वादित्यौ रक्षतां सूर्याचन्द्रमसावुभौ।। (अ.वे-8-2-15)

68. प्रति चक्ष्व वि चक्ष्वेन्द्रश्च सोम जागृतम्।
रक्षभ्यो वधमस्यतमशनिं यातुमद्भ्यः।। (अ.वे-8-4-25)

69. सोमो राजाऽधिपा मृडिता च। भूतस्य नः पतयो मृडयन्तु।। (अ.वे-10-1-22)

70. यथा यशश्चन्द्रमस्यादित्ये च नृचक्षसि।। (अ.वे-10-3-18

71. सोमस्य भागस्थ। अपां शक्र मापो देवीर्वर्चो अस्मासु धत्त। (अ.वे-10-5-9)

72. नाके राजन् प्रति तिष्ठ तत्रैतत् प्रति तिष्ठतु।
विद्धि पूर्तस्य नो राजन्त्स देव सुमना भव।। (अ.वे-6-123-5)

73. इदं यत् प्रेण्यः शिरो दत्तं सोमेन वृष्ण्यम्।
ततः परि प्रजातेन हार्दिं ते शोचयामसि।। (अ.वे-6-89-1)

74. यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः।। (अ.वे-10-7-33)

75. प्राणो ह सूर्यश्चन्द्रमाः प्राणमाहुः प्रजापतिम्।। (अ.वे-11-4-12)

76. अग्नौ सूर्ये चन्द्रमसि मातरिश्वन् ब्रह्मचार्यप्सु समिधमा दधाति।। (अ.वे-11-5-13)

77. को वेद चन्द्रमसं यतोजाः।। (य.वे-23-59)

78. अथो वेद चन्द्रमसं यतोजाः।। (य.वे-23-66)

79. चन्द्रमा मनसो जातः।। (ऋ.वे-10-90-13, य.वे-31-112, अ.वे-19-6-7)

80. पूर्वापरं चरतो माययैतौ शिशू क्रीळन्तौ परि यातो अध्वरम्।
विश्वान्यन्यो भुवनाभिचष्ट ऋतूँरन्यो विदधज्जायते पुनः।। 18 ।।
नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रे।
भागं देवेभ्यो विदधात्यायन्प्रचन्द्रमास्तिरति दीर्घमायुः।। 19 ।। (ऋ.वे-10-85)

81. सत्येनोत्तमिता भूमिः सूर्येणोत्तमिता द्यौः
ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधि श्रितः।। 1 ।।
सोमेनादित्या बलिनः सोमेन पृथिवी मही।
अथो नक्षत्राणामेषामुपस्थे सोम आहितः।। 2 ।। (ऋ.वे-10-85)

82. सोमं मन्यते पपिवान्यत्संपिंषंत्योषधिं। सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन।।
आच्छद्विधानैर्गुपितो बार्हतैः सोमरक्षितः
ग्राव्णामिच्छृण्वन्तिष्ठसि न ते आश्नाति पार्थिवः।।
यत्त्वा देव प्रपिबन्ति तत आप्यायसे पुनः।
वायुः सोमस्य रक्षिता समानां मास आकृतिः।। (ऋ.वे-10-85-3,4,5)